ष्यकारिणोऽप्रमत्तस्य त्रिवर्गं परस्परेणानुपहतमुपसेवमानस्य पूजार्हसम्पूजकस्य ज्ञानविज्ञानोपशमशीलस्य वृद्धोपसेविनः सुनियतरागरोगेर्ष्यामदमानवेगस्य सततं विविधप्रदानपरस्य तपोज्ञानप्रशमनित्यस्याध्यात्मविदस्तत्परस्य लोकमिमञ्चामुञ्चापेक्षमाणस्य स्मृतिमतो हितमायुरुच्यते”। इति च।

“अहितमतो विपर्य्ययेण प्रमाणमायुषस्त्वर्थेन्द्रियमनोबुद्धिचेष्टादीनां विकृतिलक्षणैरुपलभ्यते अनिमित्तैरिदमस्मात् क्षणान्मुहूर्त्ताद्दिवसात्त्रिपञ्चदश-सप्तदश-द्वादशाहात् पक्षान्मासात् षण्मासात् संवत्सराद्वा स्वभावमापत्स्यते इति। तत्र स्वभावः प्रवृत्तेरुपरमो मरणमनित्यतानिरोधइत्येकोऽर्थः। इत्यायुषः प्रमाणमतो विपरीतमप्रमाणम्”। इति च।

“वर्षशतं खल्वायुषः प्रमाणमस्मिन् काले तस्य निमित्तं प्रकृतिगुणात्मसम्पत् सात्म्योपसेवनञ्चेति”। इति च चरकः॥)

आयुक्तः, त्रि, (आङ्+युज्+क्तः।) कर्म्माध्यक्षः। तत्पर्य्यायः। नियोगी २ कर्म्मसचिवः ३ व्यापृतः ४। इति हेमचन्द्रः॥

आयुधः, पुं, (आयुध्यते अनेनेति। आङ्+युध्+क।) अस्त्रं। इत्यमरः॥ (आयुधानां त्रयो भेदाः। प्रहरणानि, पाणिमुक्तानि, यन्त्रमुक्तानि चेति। तत्र प्रहरणानि खड्गादीनि, पाणिमुक्तानि चक्रादीनि, यन्त्रमुक्तानि शरादीनि। “धृतायुधो यावदहं तावदन्यैः किमायुधैः”। “किं वक्ष्यत्ययमेवमद्य विमुखं मामुद्यतेऽप्यायुधे”। इति चउत्तरचरिते।)

आयुधधर्म्मिणी, स्त्री, (आयुधस्येव धर्म्मो विद्यते यस्याः। आयुधधर्म्म+इन्+ङीप्।) जयन्तीवृक्षः। इति शब्दचन्द्रिका॥

आयुधागारं, क्ली, (आयुधानां आगारं। षष्ठीतत्।) अस्त्रगृहं। सेलाखाना इति ख्यातं। इति महाभारते राजधर्म्मः॥ तत्र नियुक्तस्य लक्षणं यथा,-

“आपगागातितत्त्वज्ञः सततं प्रतिजागृता।
राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः”॥

इति मात्स्ये १८९ अध्यायः॥ (यथा मनुः ९। २८०।

“कोष्ठागारायुधागारदेवतागारभेदकान्।
हस्त्यश्वरथहर्त्तॄंश्च हन्यादेवाविचारयन्”॥)

आयुधिकः, पुं, (आयुधेन जीवति, आयुध+ठक्।) अस्त्रजीवी। तत्पर्य्यायः। शस्त्राजीवः २ काण्डस्पृष्टः ३ आयुधीयः ४। इत्यमरः॥ (यथा महाभारते १६। ७। २६।

“न पादरक्षैः संयुक्ताः नान्तरायुधिका ययुः”।

आयुधीयः, पुं, (आयुध+छ।) आयुधिकः। इत्यमरः॥ (योद्धा। यथा मनुः ७। २२२।

“अलङ्कृतश्च सम्पश्येदायुधीयं पुनर्जनं”।

उत्तरचरिते ६। “तर्ज्जयन्ति विस्फुरितशस्त्राः कुमारमायुधीयश्रेणयः”।) [रत्नमाला॥

आयुर्द्रव्यं, क्ली, (आयुषो द्रव्यम्।) औषधं। इति

आयुर्व्वेदः, पुं, (आयुरनेन विन्दति वेत्ति वेत्यायुर्व्वेदः। आयस्+विद्+करणे घञ्।) अष्टादशविद्यान्तर्गतधन्वन्तरिप्रणीतविद्याविशेषः। वैद्यकशास्त्रं। चिकित्साशास्त्रं। तत्तु अथर्व्ववेदान्तर्गतं। यथा,

“विधातार्थर्व्वसर्व्वस्वमायुर्व्वेदं प्रकाशयन्।
स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुं”॥

इति भावप्रकाशः॥

चरणव्यूहमते ऋग्वेदस्योपवेदः आयुर्व्वेदः। अथर्व्ववेदस्य शस्त्रशास्त्राण्युपवेदः॥*॥ अथायुर्व्वेदस्य विवरणम्।

“ऋग्यजुःसामाथर्व्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः।
विचिन्त्य तेषामर्थं चैवायुर्व्वेदं चकार सः॥
कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः।
स्वतन्त्रसंहितां तस्मात् भास्करश्च चकार सः॥
भास्करश्च स्वशिष्येभ्य आयुर्व्वेदं स्वसंहितां।
प्रददौ पाठयामास ते चक्रुः संहितास्ततः॥
तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च।
व्याधिप्रणाशवीजानि साध्वि मत्तो निशामय॥
धन्वन्तरिर्द्दिवोदासः काशीराजोऽश्विनीसुतौ।
नकुलः सहदेवोऽर्किश्च्यवनो जनको बुधः॥
जावालो जाजलिः पैलः करथोऽगस्त्य एव च।
एते वेदाङ्गवेदज्ञाः षोड़श व्याधिनाशकाः॥
चिकित्सातत्त्वविज्ञानं नाम तन्त्रं मनोरमम्।
धन्वन्तरिश्च भगवान् चकार प्रथमे सति॥
चिकित्सादर्पणं नाम दिवोदासश्चकार सः।
चिकित्साकौमुदीं दिव्यां काशीराजश्चकार सः॥
चिकित्सासारतन्त्रञ्च भ्रमघ्नं चाश्विनीसुतौ।
तन्त्रं वैद्यकसर्व्वस्वं नकुलश्च चकार सः॥
चकार सहदेवश्च व्याधिसिन्धुविमर्द्दनं।
ज्ञानार्णवं महातन्त्रं यमराजश्चकार सः॥
च्यवनो जीवदानञ्च चकार भगवानृषिः।
चकार जनको योगी वैद्यसन्देहभञ्जनं॥
सर्व्वसारं चन्द्रसुतो जावालस्तन्त्रसारकं।
वेदाङ्गसारं तन्त्रञ्च चकार जाजलिर्मुनिः॥
पैलो निदानं करथस्तन्त्रं सर्व्वधरं परं।
द्वैधनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः॥
चिकित्साशास्त्रवीजानि तन्त्राण्येतानि षोड़श।
व्याधिप्रणाशवीजानि बलाधानकराणि च॥
मथित्वा ज्ञानमन्थानैरायुर्व्वेदपयोनिधिं।
ततस्तन्त्राण्युज्जहरुर्नवनीतानि कोविदाः॥
एतानि क्रमशो दृष्ट्वा दिव्यां भास्करसंहितां।
आयुर्व्वेदं सर्व्ववीजं सर्व्वं जानामि सुन्दरि॥
व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः।
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः॥
आयुर्व्वेदस्य विज्ञाता चिकित्सासु यथार्थवित्।
धर्म्मिष्ठश्च दयालुश्च तेन वैद्यः प्रकीर्त्तितः”॥

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः॥*॥

तस्य लक्षणम् यथा,—

“आयुर्हिताहितं व्याधिनिदानं शमनं तथा।
विद्यन्ते यत्र विद्वद्भिः स आयुर्व्वेद उच्यते”॥

तस्य निरुक्तिर्यथा,—

“अनेन पुरुषो यस्मात् आयुर्विन्दति वेत्ति च।
तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः”॥

इति भावप्रकाशः॥*॥ अन्यत् रोगशब्दे वेदशब्दे वैद्यशब्दे च द्रष्टव्यम्॥

(“हिताहितं सुखं दुःखमायुस्तस्य हिताहितं।
मानञ्च तच्च यत्रोक्तमायुर्व्वेदः स उच्यते”॥
“तस्यायुषः पुण्यतमो वेदो वेदविदां मतः।
वक्ष्यते यन्मनुष्याणां लोकयोरुभयोर्हितः”॥

“किमायु कस्मादायुर्व्वेदः किञ्चायुर्व्वेदः शाश्वतो ऽशाश्वत इति। कानि चास्याङ्गानि कैश्चायमध्येतव्यः किमर्थञ्चेति”।

“तत्र भिषजा पृष्टेनैवञ्चतुर्णामृक्सामयजुरथर्व्ववेदानामात्मनोऽथर्व्ववेदे भक्तिरादेश्या वेदोह्याथर्व्वणः स्वस्त्ययनबलिमङ्गलहोमनियमप्रायश्चित्तोपवासमन्त्रादिपरिग्रहाच्चिकित्सां प्राह चिकित्सा चायुषो हितायोपदिश्यते वेदश्चोपदिश्यायुर्वाच्यं तत्रायुश्चेतनाप्रवृत्तिर्जीवितमनुबन्धो धारि चेत्येकोऽर्थः, तदा आयुर्व्वेदयत्यायुर्व्वेदः कथमुच्यते स्वलक्षणतः सुखासुखतो हिताहिततः प्रमाणाप्रमाणतश्च यतश्चायुष्याणायुष्याणि द्रव्यगुणकर्म्माणि वेदयत्यतोऽप्यायुर्व्वेदः तत्रायुष्याणि अनायुष्याणि च द्रव्यगुणकर्म्माणि केवलेनोपदेक्ष्यन्ते”।

“तानिन्द्रः सहस्रदृगमरगुरुवरोऽब्रवीत् स्वागतं ब्रह्मविदां ज्ञानतपोधनानां ब्रह्मर्षीणामस्ति भुवो ग्लानिरप्रभावत्वं वैस्वर्य्यं वैवर्ण्यञ्च ग्राम्यवासकृतमसुखमसुखानुबन्धं च। ग्राम्यो हि वासो मूलमशस्तानां तत्कृतं पुण्यकृद्भिरनुग्रहः प्रजानां स्वशरीरमरक्षिभिः कालश्चायमायुर्व्वेदोपदेशस्य ब्रह्मर्षीणामात्मनः प्रजानाञ्चानुग्रहार्थमायुर्व्वेदमश्विनौ मह्यं प्रयच्छतां प्रजापतिरश्विभ्यां। प्रजापतये ब्रह्मा प्रजानामल्पमायुर्ज्जराव्याधिबहुलमसुखमसुखानुबन्धं अल्पत्वादल्पतपोदमनियमदानाध्ययनसञ्चयं मत्वा पुण्यतममायुःप्रकर्षकरं जराव्याधिप्रशमनं ऊर्ज्जस्करममृतं शिवं शरण्यमुदात्तं भवन्तो मत्तः श्रोतुमर्हन्त्युपधारयितुं प्रकाशयितुञ्च प्रजानुग्रहार्थमार्षं ब्रह्म च मैत्रीं कारुण्यमात्मनश्चानुत्तमं पुण्यमुदारं ब्राह्ममक्षयं कर्म्मेति”। इति चरकः॥

“तानुवाच भगवान् स्वागतं वः। सर्व्वत्र वा मीमांस्या अध्याप्याश्च भवन्तो वत्साः! इह खल्वायुर्व्वेदो नाम यदुपाङ्गमथर्व्ववेदस्यानुत्पाद्यैव प्रजाः श्लोकशतसहस्रमध्यायसहस्रञ्च कृतवान् स्वयम्भूः। ततोऽल्पायुष्ट्वमल्पमेधस्त्वञ्चावलोक्य नराणां भूयोऽष्टधा प्रणीतवान्॥ तद्यथा॥ शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति”॥

“वत्स! सुश्रुत! इह खल्वायुर्व्वेदप्रयोजनं व्याध्युपसृष्टानां व्याधिपरिमोक्षः स्वस्थस्य रक्षणञ्च। आयुरस्मिन् विद्यतेऽनेन वा आयुर्विन्दतीत्यायुर्व्वेदः। तस्याङ्गवरमाद्यमागमप्रत्यक्षानुमानोपमानैरविरुद्धमुच्यमानमुपधारय। एतद्ध्यङ्गं प्रथमं प्रागभिघातव्रणसंरोहादयज्ञशिरःसन्धानाच्च”।

“तदिदं शाश्वतं पुण्यं स्वर्ग्यं यशस्यमायुष्यं वृत्तिकरञ्चेति”॥